अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे।

सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः।।

**प्रसङ्ग-**

प्रस्तुतोऽयं मन्त्रः कठोपनिषदः उधृतोऽस्ति। उपनिषदां मध्ये कठोपनिषदः उल्लेखनीया वर्तते। अस्मिन् उपनिषदि नचिकेतासम्बन्धिनी कथा वर्णिता आस्ते। कठोपनिषद् आत्मविद्यायाः प्रतिपादकः ग्रन्थः। अस्मिन् मन्त्रे वर्णितमस्ति यत् मनुष्यः सस्यमिव जीर्णो जायते पुनः मर्त्यलोके उत्पन्नो भवति। अत एव पितृपितामहादयानां वृत्तमाचरणीयम्। मन्त्रस्यास्य व्याख्या अधोलिखिता वर्तते-

**व्याख्या-**

तातस्य 'मृत्यवे त्वा ददामि' इति वचनं श्रुत्वा नचिकेता चिन्तितवान्-अनुक्रमेण यथा येन प्रकारेण वृत्ताः पूर्वे अतिक्रान्ताः पितृपितामहादयस्तव तान्दृष्ट्वा च तेषां वृत्तं आस्थातुमर्हसि। वर्तमानश्चापरे साधवो यथा वर्तन्ते तांश्च प्रतिपश्य आलोचय। मर्त्यः मनुष्यः सस्यमिव धान्यवत् पच्यते जीर्णो म्रियते। मृत्वा च सस्यमिव धान्यवत् आ जायते आविर्भवति।

**टिप्पणी-**

1. अस्मिन् मन्त्रे उपमा अलङ्कारः वर्तते।
2. अस्मिन् मन्त्रे संसारस्य नश्वरता विवेचिता।
3. सन्धिविच्छेद-

सस्य+इव= सस्यमिव

सस्यम्+इव+ आजायते=सस्यमिवाजायते

4. प्रकृति-प्रत्यय-

यथा-यत्+थाल्

सस्यम्-सस्+यत्